## अध्याय :- ५३ Chapter-53

नारद उवाच ।।[१]
अथान्यत्संप्रवक्ष्यामि शालामाहात्म्य ऽमुत्तमम् ।।
संस्थापिते ऽपुरा स्थाने प्रोक्तोहं द्विजपुंगवैः ।। १

स्थानस्य रक्षणार्थाय उपायं कुरु सुव्रत ।।
ततो मया प्रतिज्ञातं करिष्ये स्थान रक्षणम् ।। २

आराधिता मया पश्चाद्ब्रह्म - विष्णु महेश्वराः[२] ।।
त्रयस्त्वैकाग्र चित्तेन ततस्तुष्टाः सुरोत्तमाः ।। ३

समागम्याथ मां प्रोचुर्नारद व्रियतां वरः ।।
प्रोक्तं तानार्च्य च मया क्रियतां स्थान रक्षणम् ।। ४

अयमेव वरो मह्यं देयो देवैः सुतोषितैः[३] ।।
स्थानलोपो यथा न स्याद्यथा कीर्तिर्भवेन्मम् ।। ५

एवमस्त्विति देवेशैः प्रतिज्ञातं तदा मुने ।।
स्वाशिन प्रकरिष्यामः द्विजानां तव रक्षणम् ।। ६

एवमुक्त्वा कला मुक्ता देवै ऽस्त्रिपुरुषैः स्वयम् ।।
अंतर्धानं ततः प्राप्ताः सर्वेऽपि सुरसत्तमाः ।। ७

---

१ अ. श्रीनारद ।। ब. श्रीनारद उ० ।।
२ ब. महेश्वरम्
३ ब. सुतोषितैः

ततो मया द्विजैः सार्धं शालाग्रे स्थानरक्षणम् ।।
स्थापिताश्चैव पृथग्देवास्त्रयस्त्रि भुवनेश्वराः ।। ८

पीड्यमाना यदा[1] विप्राः केनापि च भवंति हि ।।
पूर्वाह्णे चापि ऋग्वेदं मध्याह्ने च यजूंष्यथ ।। ९

यामे तृतीये सामानि तारस्वरमधीत्य च ।।
शापं यस्य प्रदास्यंति शालाग्रे भूशरोक्षिताः ।। १०

सप्ताहादूर्ध्वं मध्याद्वा त्रिवर्षाद्भस्मतां व्रजेत् ।।
प्रतिज्ञाता स्थानरक्षा यदि वो नारदाग्रतः[2] ।। ११

सत्येन तेन नो वैरी भस्मी भवतु ह क्षणात् ।।
अनेन शाप मंत्रेण भस्मी भवति निश्चितम् ।। १२

शालां त्रिपुरुषां[3] तत्र यः पश्यति दिने दिने ।।
अर्चयित्वा पयेच्चासौ स्वर्गलोके महीय्यते ।। १३

इति त्रिपुरुषशालामाहात्म्यम् ।। *४
नारद उवाच ।।[5]
अथान्यत्संप्रवक्ष्यामि मदियसरसो महत् ।। १४

---

१ अ. यथा २ अ. ग्रताः
३ अ. प्रतौ नास्ति ।
*४ अ. इति श्री स्कंद पुराणे कुमारिका खंड त्रिपुरुषशाला माहात्म्यं ।।
ब. इति श्री स्कंद पुराणे त्रिपुरुषाशाला महात्म्यांत तीय पंचशोध्यायः (मुद्रित पुस्तके अध्यायः सातत्यम् )
५ ब. श्री नारद ।।

माहात्म्यमतुलं पार्थ देवानामपि दुर्लभम् ।।
मया पूर्व सरः खातं दर्भांकुर शलाकया ।। १५

मृत्तिका ताम्रपात्रेण त्यक्ता बाह्ये ततः स्वयम् ।।
सर्वेषामेव तीर्थानामात्तदत्योदकमुत्तमम् ।। १६

तत्तत्र सरसि क्षिप्तं तेन संपूरितं सरः ।।
आश्विने[1] मासि संप्राप्ते भानुवारे नरः शुचिः[2] ।। १७

श्राद्धं यः कुरुते तत्र स्नात्वा दानं विशेषतः ।।
पितरस्तस्य तृप्यंति यावदा भूत संपलवम् ।। १८

नारदीयं सरो ह्येत द्विख्यातं जगतीतले ।।
महता पुण्ययोगेन दैवैरपि हि लभ्यते ।। १९

यदत्र दीयते दानं हूयते यच्च पावके ।।
सर्वं तदक्षयं विद्याज्जपानशन साधनात्[3] ।। २०

नारदीये सरः श्रेष्ठे[4] स्नात्वा यो नारदेश्वरम् ।।
पूजयेच्छ्रद्धया मर्त्यः सर्वपापैः प्रमुच्यते ।। २१

---

१ अ. अश्विने
२ अ. श्रचिः
३ ब. साधना ।।
४ अ. श्रेष्टे

अत्र तीर्थे पुरा पार्थ सर्व नागैस्तपः कृतम् ।।
कद्रुशापस्य मोक्षार्थमात्मनो हितकाम्यया ।। २२

ततः सिद्धिं परां प्राप्ता एतत्तीर्थ[1] प्रभावतः ।।
ततो नागेश्वरं लिंगं स्थापयामासुरूर्जितम् ।। २३

नारदादुत्तरे भागे सर्वे नागाः प्रहर्षिताः ।।
नारदीये सरः श्रेष्ठे[2] यः स्नात्वा पूजयेद्धरम् ।। २४

नागेश्वरं महाभक्त्या तस्य पुण्यमनन्तकम् ।।
तेषां सर्वभयं नास्ति नागानां वचनं यथा ।। २५

इति नारदीयसरोमाहात्म्यम् ।।
नारद उवाच ।।[3]
अपराद्धारकानाम देवी चात्रास्ति पांडव ।। २६

सा च[4] ब्रह्मांडद्वारे वै सदैव विहितालया ।।
चतुर्विंशति कोटीभिर्देवीभिः परिरक्षिता ।। २७

ततो दीर्घं तपस्तप्त्वा मयानीतात्र तोषिता ।।
अपरस्मिंस्ततो द्वारे स्थापिता परमेश्वरी ।। २८

---

१ ब. प्रती 'अस्य' इति पाठः ।
२ अ. श्रेष्टे
३ अ. श्री नारद ।। ब. श्री नारद उ० ।।
४ ब. प्रती नास्ति ।

पूर्वस्मिन्नगरद्वारे स्थापिता द्वारवासिनी ।।
नवमी चैत्रमासस्य कृष्णपक्षे भवेत्तु या ।। २९

कुण्डे स्नात्वा नरः कृत्वा तां च देवीं प्रपूजयेत् ।।
बलिबाकुलनैवेद्यैर्गन्ध धूपादि पूजनैः ।। ३०

सप्तजन्मकृतं पापं नाशमायाति तत्क्षणात् ।।
यान्यान्प्रार्थयते कामांस्तांस्तानाप्नोति मानवः ।। ३१

वन्ध्या च लभते पुत्रं स्नानमात्रेण तत्र वै ।।
नवम्यां चैत्रमासस्य पुष्पधूपार्घ्य पूजया ।। ३२

विघ्नानि नाशयेद्देवी सर्व सिद्धिं प्रयच्छति ।।
भक्तानां तत्क्षणादेव सत्यमेतन्न संशयः[१] ।। ३३

उत्तरद्वारकां चापि पूज्यैवं विधिवन्नरः ।।
एतदेव फलं सोऽपि प्राप्नुयान्मानवोत्तमः ।। ३४

पूर्वद्वारे तु वै देवी या स्थिता द्वारवासिनी ।।
तस्याः पूजनमात्रेण प्राप्नुयाद्वांछितं फलम् ।। ३५

---

१ अ. संशय

आश्विने[1] मासि संप्राप्ते नवरात्रे[2] विशेषतः ।।
उपोष्य नवरात्रं च स्नात्वा कुण्डे समाहितः ।। ३६

पूजयेद्देवतां ~~भक्त~~ भक्त्या पुरुषधूपान्नतर्पणैः ।।
अपुत्रो लभते पुत्रान्निर्धनो लभते धनम् ।। ३७

वन्ध्या प्रसूयते पार्थ नात्रकार्या विचारणा ।। ३८

* इति श्री स्कांदे.....कोटितीर्थादि माहात्म्य वर्णनं नाम त्रिपंचाशत्तमोऽध्यायः
।।५३।।

---

१ अ. ब. 'अश्विनेन'
२ ब. 'नररात्रे'
*३ अ. इति श्री स्कंद पुराणे कोटि तीर्थादि माहात्म्यं ।।
ब. इति श्री स्कंद पुराणे कोटितीर्थादि महात्म्यं पंचपंचशोऽध्यायः ।।

(Ac~~t~~tually it is 53rd chapter)